श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ एकोनसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनसप्ततितमः सर्गः ॥

## सबलस्य दशरथस्य मिथिलायां गमनं तत्र जनकेन तस्य सत्कारश्च

ततो रात्र्यां व्यतीतायां सोपाध्यायः सबान्धवः।
राजा दशरथो हृष्टः सुमन्त्रमिदमब्रवीत्॥ **1.69.1** ॥

अद्य सर्वे धनाध्यक्षा धनमादाय पुष्कलम्।
व्रजन्त्वग्रे सुविहिता नानारत्नसमन्विताः॥ **1.69.2** ॥

चतुरङ्गबलं चापि शीघ्रं निर्यातु सर्वशः।
ममाज्ञासमकालं च यानं युग्यमनुत्तमम्॥ **1.69.3** ॥

वसिष्ठो वामदेवश्च जाबालिरथ कश्यपः।
मार्कण्डेयस्तु दीर्घायुर्ऋषिः कात्यायनस्तथा॥ **1.69.4** ॥

एते द्विजाः प्रयान्त्वग्रे स्यन्दनं योजयस्व मे।
यथा कालात्ययो न स्याद् दूता हि त्वरयन्ति माम्॥ **1.69.5** ॥

वचनाच्च नरेन्द्रस्य सेना च चतुरङ्गिणी।
राजानमृषिभिः सार्धं व्रजन्तं पृष्ठतोऽन्वयात्॥ **1.69.6** ॥

गत्वा चतुरहं मार्गं विदेहानभ्युपेयिवान्।
राजा च जनकः श्रीमाञ्श्रुत्वा पूजामकल्पयत्॥ **1.69.7** ॥

ततो राजानमासाद्य वृद्धं दशरथं नृपम्।
मुदितो जनको राजा प्रहर्षं परमं ययौ॥ **1.69.8** ॥

उवाच वचनं श्रेष्ठो नरश्रेष्ठं मुदान्वितम्।
स्वागतं ते नरश्रेष्ठ दिष्ट्या प्राप्तोऽसि राघव॥ **1.69.9** ॥

पुत्रयोरुभयोः प्रीतिं लप्स्यसे वीर्यनिर्जिताम्।
दिष्ट्या प्राप्तो महातेजा वसिष्ठो भगवानृषिः॥ **1.69.10** ॥

सह सर्वैर्द्विजश्रेष्ठैर्देवैरिव शतक्रतुः।
दिष्ट्या मे निर्जिता विघ्ना दिष्ट्या मे पूजितं कुलम्॥ **1.69.11** ॥

राघवैः सह सम्बन्धाद् वीर्यश्रेष्ठैर्महाबलैः।
श्वः प्रभाते नरेन्द्र त्वं संवर्तयितुमर्हसि॥ **1.69.12** ॥

यज्ञस्यान्ते नरश्रेष्ठ विवाहमृषिसत्तमैः।
तस्य तद् वचनं श्रुत्वा ऋषिमध्ये नराधिपः॥ **1.69.13** ॥

वाक्यं वाक्यविदां श्रेष्ठः प्रत्युवाच महीपतिम्।
प्रतिग्रहो दातृवशः श्रुतमेतन्मया पुरा॥ **1.69.14** ॥

यथा वक्ष्यसि धर्मज्ञ तत् करिष्यामहे वयम्।
तद् धर्मिष्ठं यशस्यं च वचनं सत्यवादिनः॥ **1.69.15** ॥

श्रुत्वा विदेहाधिपतिः परं विस्मयमागतः।
ततः सर्वे मुनिगणाः परस्परसमागमे॥ **1.69.16** ॥

हर्षेण महता युक्तास्तां रात्रिमवसन् सुखम्।
अथ रामो महातेजा लक्ष्मणेन समं ययौ॥ **1.69.17** ॥

विश्वामित्रं पुरस्कृत्य पितुः पादावुपस्पृशन्।
राजा च राघवौ पुत्रौ निशाम्य परिहर्षितः॥ **1.69.18** ॥

**उवास परमप्रीतो जनकेनाभिपूजितः।**
**जनकोऽपि महातेजाः क्रिया धर्मेण तत्त्ववित्।**
**यज्ञस्य च सुताभ्यां च कृत्वा रात्रिमुवास ह॥ 1.69.19॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकोनसप्ततितमः सर्गः॥